संस्कृतस्वाध्यायः

चतुर्थी दीक्षा - वाङ्मयावगाहनी

# भर्तृहरिनीतिशतकम्

( उत्तरार्द्धम् )

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# विषयसूची


| पाठाः | | विषयाः | | पृ.सं. |
|---|---|---|---|---|
| प्रथमः | पाठः | महतां स्वभावः | श्लोकसङ्ख्या | 01-40 |
| | | वाञ्छा सज्जनसङ्गतौ .... | 51 | |
| | | विपदि धैर्यमथाभ्युदये .... | 52 | |
| | | करे श्लाघ्यस्त्यागः .... | 53 | |
| | | सम्पत्सु महतां .... | 54 | |
| | | प्रदानं प्रच्छन्नं .... | 55 | |
| द्वितीयः | पाठः | सत्सङ्गः/सताम् आचरणम् | | 41-68 |
| | | सन्तप्तायसि संस्थितस्य .... | 56 | |
| | | यः प्रीणयेत्सुचरितैः .... | 57 | |
| | | नम्रत्वेनोन्नमन्तः परगुणकथनै .... | 58 | |
| तृतीयः | पाठः | परोपकारः | | 69-105 |
| | | भवन्ति नम्रास्तरवः .... | 59 | |
| | | श्रोत्रं श्रुतेनैव .... | 60 | |
| | | पद्माकरं दिनकरो .... | 61 | |
| | | एते सत्पुरुषाः .... | 62 | |
| चतुर्थः | पाठः | सतां मैत्री | | 106-160 |
| | | पापान्निवारयति योजयते .... | 63 | |
| | | क्षीरेणात्मगतोदकाय हि .... | 64 | |
| | | इतः स्वपिति .... | 65 | |
| | | तृष्णां छिन्धि भज .... | 66 | |
| | | मनसि वचसि .... | 67 | |
| | | किं तेन हेमगिरिणा .... | 68 | |

# पुरोवाक्

भर्तृहरिनीतिशतकस्य पूर्वार्धम् आधारीकृत्य रचिता स्वाध्यायसामग्री संस्थानेन पूर्वं प्रकाशिता आसीत्। तस्यैव उत्तरार्धस्य प्रकाशनविषयकः सङ्कल्पः अधुना साकारतां गतः।

स्वाध्याययोजनाविषये, चतुर्थदीक्षास्तरविषये, भर्तृहरिमुद्दिश्य, नीतिशतकमुद्दिश्य च पूर्वं प्रकाशितपूर्वार्धस्य पुरोवाचि निरूपितमित्यतः तत्पुनरत्र न विव्रियते।

अत्र हि उत्तारार्धे महतां स्वभाववर्णनात्मकाः पञ्च श्लोकाः, सत्सङ्गविषये सतामाचरणविषये च त्रयः श्लोकाः, परोपकारविषयिणः चत्वारः श्लोकाः, सतां मैत्रीमुद्दिश्य रचिताः षट् श्लोकाः, धीरताबोधकाः पञ्च श्लोकाः, शीलसंरक्षणविषयकाः चत्वारः श्लोकाः, विधिलीलावर्णनात्मकाः अष्टौ श्लोकाः, आपदि धैर्यधारणबोधकौ द्वौ श्लोकौ, सत्कर्मप्रशंसकाः नव श्लोकाः, तपःपुण्यफलनिरूपकाः चत्वारः, सद्गुणप्रशंसाविषयकौ द्वौ चेति आहत्य 50 श्लोकाः सङ्गृहीताः सन्ति। नीतिबोधकान् तान् महत्त्वपूर्णान् श्लोकान् आधारीकृत्य रचिता एषा स्वाध्यायसामग्री। विषयसमूहस्य आधारेण गणशः श्लोकान् विभज्य इह 11 (एकादश) पाठाः कल्पिताः।

अत्रेदम् अवधेयं यत् विभिन्नप्रकाशकैः प्रकाशितेषु भर्तृहरिनीतिशतकस्य विभिन्नसंस्करणेषु श्लोकानाम् उपस्थापनस्य अनुक्रमे भेदोऽस्ति। श्लोकानां संख्यायामपि भेदो लक्ष्यते। क्वचित् आहत्य अष्टनवति-श्लोकाः, क्वचित् शतम्, क्वचित् 102, क्वचित् इतोप्यधिकश्लोकाः इत्येवं भेदो दृश्यते। राष्ट्रियसंस्कृतसंस्थानेन तावत् अस्यां योजनायां प्रकाशिते भर्तृहरिनीतिशतकस्य पूर्वार्धे 50 श्लोकाः, सम्प्रति प्रकाश्यमाने उत्तारार्धे च 50 एव श्लोकाः स्वाध्यायसामग्रीनिर्माणाय प्रयुक्ताः। किन्तु अध्येतृणाम् अनुसन्धातृणां चोपयोगाय ग्रन्थान्ते अतिरिक्तश्लोकानां सङ्ग्रहः प्रदत्तः यत्र भर्तृहरिप्रणीतनीतिसुभाषितत्वेन कैश्चिद् विद्वद्भिः अभिमताः, नीतिशतकस्य विभिन्न-संस्करणेषु प्रकाशिताः (अतिरिक्त)-श्लोकाः सङ्कलिताः।

ग्रन्थस्यास्य अध्येतारः भाषाशिक्षणेन सह, संस्कृतसुभाषितसाहित्यस्य माधुरीम् आस्वादयेयुः, भाषायां प्रौढिमां प्राप्नुयुः, विभिन्नशैल्या प्रयोगसामर्थ्यं प्राप्नुयुः आशयानां विशदीकरणसामर्थ्यं च प्राप्नुयुः इत्याशासे।

सन्दर्भेऽस्मिन् अस्याः स्वाध्यायसामग्र्याः लेखन-पुनरीक्षण-सम्पादन-संयोजनादिकर्मभिः सम्बद्धान् संस्थानपरिवारसदस्यान्, मुद्रकं च अभिनन्दामि।

राधावल्लभत्रिपाठी
कुलपतिः

7. द्वितीयान्तपदानि लिखत–

...............................................................................

...............................................................................

8. समाधत्त–

(i) सन्तः केन रूपेण उन्नतिं प्राप्नुवन्ति ?

...............................................................................

(ii) स्वगुणं कथं ख्यापयन्ति सत्पुरुषाः ?

...............................................................................

(iii) सज्जनाः दुर्जनान् केन प्रकारेण दुःखयन्ति ?

...............................................................................

(iv) साश्चर्यचर्याः कुत्र बहुमताः भवन्ति ?

...............................................................................

9. अधोलिखितशब्देषु प्रकृतिप्रत्ययादिकं निर्दिशत–

(i) उन्नमन्तः – .................... ....................

(ii) स्वान् – .................... ....................

(iii) परार्थे – .................... ....................

(iv) जगति – .................... ....................

(v) सम्पादयन्तः – .................... ....................

10. उन्नमन्तः, ख्यापयन्तः, सम्पादयन्तः, दुःखयन्तः इति शतृप्रत्ययान्तानि रूपाणि सन्ति। एवमेव निम्नलिखितधातुभिः रूपाणि रचयत–

(i) खाद् + शतृ प्रथमा बहुवचने – ....................

(ii) दृश् + णिच् (दर्शि) शतृ, प्रथमैकवचने – ....................

# Teach Yourself Samskrit

पञ्चमी दीक्षा
**व्युत्पादिनी**

चतुर्थी दीक्षा
**वाङ्मयावगाहनी**

तृतीया दीक्षा
**वाङ्मयावतरणी**

द्वितीया दीक्षा
**व्यवहारावगाहनी**

प्रथमा दीक्षा
**व्यवहारावतरणी**

**संस्कृतस्वाध्यायः**

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली